एकादशोऽध्यायः

युञ्जानः प्रथमं मनस्तत्वाय सविता धियः ।
अग्नेर्ज्योतिर्निचाय्य पृथिव्या अध्याभरत् ॥ १ ॥

[ओ३म् ॥ युञ्जानः । प्रथमम् । मनः । तत्वाय । सविता । धियः । अग्नेः । ज्योतिः । निचाय्येतिनि चाय्य । पृथिव्याः । अधि । आ । अभरत् ॥ १ ॥]

(अध्याय ग्यारह से प्रारम्भ करके अध्याय अट्ठारह तक यज्ञ की वेदि बनाने के मंत्र दिए गए हैं । वेदि गहरी पृथ्वी में गड्ढा खोद कर बनाई जाती है । आहुतियों के परिमाण और यज्ञकर्म के उद्देश्य के भेद से वेदि के निर्माण के भी अनेक भेदप्रभेद हैं । वेदि की अन्दर की दीवारों को पकी हुई ईंटों से चुन दिया जाता है । यह ईंटें वेदि की लम्बाई चौड़ाई आदि के विचार के साथ नापकर और बड़ी सावधानी से बनाई जाती है । ईंटों की इस चिनाई को 'चिति' कहते हैं । साधारण वेदि में पाँच चितियाँ होती हैं) ।

सबसे प्रथम सर्वप्रेरक या उत्पादक सविता देव ने अपने मन में वेदिचयन का निश्चय एवं उसके प्रकार प्रभृति का पर्यालोचन अपनी बुद्धि से करके और साथ ही अग्नि की ज्योति के सर्वफल साधकत्व का भी निश्चय करके उसने पृथ्वी से वेदि बनाने की ईंटों आदि का आहरण किया ॥ १ ॥

उ० अष्टावध्याया अग्निसंबद्धास्तान्प्रजापतिर्ददर्श । साध्या वा ऋषयः प्रजापतेः प्राणभूताः । अथ पञ्चधा दर्शितः 'प्रजापतिः प्रथमां चितिमपश्यत् प्रजापतिरेव तस्या आर्षेयम् । देवा द्वितीयां चितिमपश्यन् त एव तस्या आर्षेयम् । इन्द्राग्नी च विश्वकर्मा च तृतीयां चितिमपश्यन् त एव तस्या आर्षेयम् । ऋषयश्च चतुर्थीं चितिमपश्यन् ऋषय एव तस्या आर्षेयम् । परमेष्ठी पञ्चमीं चितिमपश्यत् परमेष्ठ्येव तस्या आर्षेयमिति' । अथवा प्रतिकर्मदर्शी नः सवितैतानि सावित्राण्यपश्यदिति । युञ्जानः प्रथमं मनः । अष्टौ कण्डिकाः सवित्रा दृष्टाः सवितृदेवत्याः ताभिः संततज्याहुतिर्हूयते । प्रथमाऽनुष्टुप् । अग्न्यारम्भे सविता युञ्जानः नियुञ्जानः प्रथमं मनः ततोऽनन्तरम् तत्वाय । 'तनु विस्तारे' । क्त्वो ल्यप् छान्दस उपजनः । तनित्वा विस्तार्य धियः बुद्धीः मनसा पर्यालोच्य बुद्ध्याऽवधार्येत्यर्थः । अग्नेर्ज्योतिः अग्निसंबन्धि ज्योतिः । पञ्चसु पशुषु प्रविष्टं निचाय्य उपलभ्य । 'यथा वा अग्निः समिद्धो दीप्यते' इत्यादिना । ततः पशुरूपान्वितायाः पृथिव्या अध्याभरत् अध्याहृतवानग्निं इष्टकां कृत्वा चितवानग्निम् । श्रुतौ प्रजापतिः कर्तोपदिष्टः तदनुकृत्या इदानींतना यजमाना उपदिश्यन्ते प्रजापतिर्वै युञ्जान इति ॥ १ ॥

म० रमाकान्तं नमस्कृत्य गणेशं शारदां गुरुम् । संहितैकादशाध्याये मन्त्रदीपो वितन्यते ॥ एकादशमारभ्याष्टादशाध्यायपर्यन्तमग्निचयनमन्त्राः । तेषां प्रजापतिर्ऋषिः साध्या ऋषयो वा । सोऽग्निः पञ्चचितियुक्तः प्रथमचितिमन्त्राणां प्रजापतिर्ऋषिः द्वितीयचितेर्देवा ऋषयः तृतीयचितेरिन्द्राग्निविश्वकर्माण ऋषयः । चतुर्थचितेर्ऋषय एवर्षयः । पञ्चमचितिमन्त्राणां परमेष्ठी ऋषिः । तथाच श्रुतिः 'प्रजापतिः प्रथमां चितिमपश्यत् प्रजापतिरेव तस्या आर्षेयं देवा द्वितीयां चितिमपश्यन् देवा एव तस्या आर्षेयमिन्द्राग्नी च विश्वकर्मा च तृतीयां चितिमपश्यंस्त एव तस्या आर्षेयमृषयश्चतुर्थीं चितिमपश्यन्नृ-

षय एव तस्या आर्षेयं परमेष्ठी पञ्चमीं चितिमपश्यत् परमेष्ठ्येव तस्या आर्षेयमिति' (६।२।६।१०)। चयनं कर्तुमिच्छन् फाल्गुनकृष्णप्रतिपदि पौर्णमासेष्टिं कृत्वा पुरुषाश्वगोऽव्यजानालभ्याजेन यागं कृत्वा पञ्चानां शिरांसि घृताक्तानि प्रथमचितावुपधानार्थं क्वचित्संस्थाप्य तेषां कबन्धान्यप्सुशेषं च मृत्युक्ते तडागादिजले प्रास्येत्। उखार्थमिष्टकार्थं च मृदं जलं च तत एवादेयम् । ततः फाल्गुनकृष्णाष्टम्यामुखासंभरणम्। तदर्थमाह–वनीयदक्षिणाग्नी उद्धृत्याहवनीयात् प्राक् कृते चतुष्कोणे गर्ते ततस्तडागान्मृत्पिण्डमानीय भूसमं स्थापयेत्। पिण्डाहवनीयान्तराले सच्छिद्रां वल्मीकमृदं निदध्यात्। आहवनीयाद्दक्षिणदेशेऽश्वगर्दभाजाः प्राङ्मुखाः प्रागपरा मुञ्जरसनाबद्धाः स्थाप्याः। आहवनीयोत्तरे वैण्व्युभयतस्तीक्ष्णा कल्माषी हिरण्मयी वाभ्रिः स्थाप्या। ततः कर्माह 'अष्टागृहीतं जुहोति सन्ततमुद्गृह्णन् युञ्जानः' (का० १६।२।७) इति। अस्यार्थः। गार्हपत्ये घृतं संस्कृत्य जुहूं स्रुवं च संमृज्य स्रुच्यष्टागृहीतमाज्यमाहवनीये परिस्तरणसमिदाधानपूर्वकं सन्ततमविच्छिन्नधारया स्रुचमूर्ध्वां कुर्वन्नध्वर्युर्जुहोति युञ्जान इत्याद्यष्टकण्डिकाभिः । सान्तत्यं चाष्टर्चान्ते स्वाहाकारपर्यन्तम्। आद्यानुष्टुप् तृतीयः सप्ताक्षरः । अष्टानां सविता ऋषिः देवोऽपि सविता । अथ मन्त्रार्थः। सविता सर्वस्य प्रेरकः प्रजापतिः अग्नेर्ज्योतिः चीयमानस्य वह्नेः सम्बन्धि तेजः निचाय्य पञ्चपशुषु प्रविष्टं निश्चित्योपलभ्य। यद्वा सफलानां कर्मणां साधनभूतं निश्चित्य। पृथिव्याः पशुशरीरान्वितायाः भूमेः सकाशादध्याभरत् अध्याहृतवान् । इष्टकाः कृत्वाग्निं चितवानित्यर्थः। सवितृशब्देन श्रुतौ प्रजापतिरुक्तः 'प्रजापतिर्वै युञ्जानः' (६।३।१।१२) इति श्रुतेः। किंभूतः। प्रथममग्न्यारम्भे मनो युञ्जानः समादधानः युङ्क्तेऽसौ युञ्जानः। किं कृत्वा। धियो बुद्धीरिष्टकादिविषयाणि ज्ञानानि तत्वाय तनित्वा। निस्तार्य मनसा पर्यालोच्य बुद्ध्यावधार्येत्यर्थः। 'तनु विस्तारे' 'समानकर्तृकयोः पूर्वकाले' (पा० ३।४।२१) इति क्त्वाप्रत्ययः। अनित्यमागमशासनमितीडागमाभावः। 'अनुदात्तोपदेश–' (पा० ६।४।३७) इत्यादिना नलोपः 'क्त्वो यक्' (पा० ७।१।४७) इति क्त्वाप्रत्ययान्तस्य यगागमः ॥ १ ॥

युक्तेन मनसा वयं देवस्य सवितुः सवे । स्वर्ग्याय शक्त्या ॥ २ ॥

[युक्तेन । मनसा । वयम् । देवस्य । सवितुः । सवे । स्वर्ग्यायेतिस्वः ऽ । ग्याय । शक्त्या ॥ २ ॥]

उसी प्रथम सर्वप्रेरक सवितादेव के सम्प्रेरण में विद्यमान हम आजकल के यज्ञकर्त्ता ब्राह्मण भी अपने मनमें यज्ञकर्म को धारण करके स्वशक्तिभर, स्वर्ग जाने की कामना से, वेदि का चयन करते हैं ॥ २ ॥

उ० युक्तेन मनसा। गायत्री। युक्तेन एकाग्रेण मनसा वयं देवस्य सवितुः सवे प्रसवे वर्तमानाः स्वर्ग्याय स्वर्गसाधनाय कर्मणे। शक्त्या यथाशक्त्या प्रयत्नं कुर्म इति शेषः ॥२॥

म० गायत्री। तृतीयः पादः पञ्चार्णस्तेन शङ्कुमती। तदुक्तं पिङ्गलेन 'एकस्मिन् पञ्चके छन्दः शङ्कुमती' इति। सवितुर्देवस्य प्रजापतेः सवे प्रसवे आज्ञायां वर्तमाना वयं यजमाना युक्तेनेन्द्रियेभ्यो नियमितेनैकाग्रेण मनसा स्वर्ग्याय स्वर्गसाधकाय कर्मणे शक्त्या स्वसामर्थ्येन प्रयत्नं कुर्म इति शेषः ॥ २ ॥

युक्त्वाय सविता देवान्स्वर्यतो धिया दिवम् । बृहज्ज्योतिः करिष्यतः सविता प्रसुवाति तान् ॥३॥

[युक्त्वाय । सविता । देवान् । स्वः ऽ । यतः । धिया । दिवम् । बृहत् । ज्योतिः । करिष्यतः । सविता । प्र । सुवाति । तान् ॥३॥]

अग्निकर्म में संयोजित करके सर्वप्रेरक सवितादेव स्वर्ग को जाने वाले, स्वबुद्धि से द्युलोक का चिन्तन करने वाले और सर्वफल साधक अग्नि की महती, ज्योति को यज्ञरूप में प्रचलित करने वाले देवों को वेदि चयन के लिए सम्प्रेरित करता है ॥ ३ ॥

उ० युक्त्वाय अनुष्टुप्। सविता प्रसुवाति तानिति तदो दर्शनादिह यद्योगः कर्तव्यः। नित्यसंबन्धौ हि यत्तदौ। युक्त्वाय। यकार उपजनोऽनर्थान्तरवचनः। युक्त्वाय सविता यत् देवान् अग्निकर्मणि अन्येन कर्मणा स्वर्यतः स्वर्लोकं गच्छतः धिया बुद्ध्या कर्मणा वा दिवं द्योतनं स्वर्गम् । बृहत् महत् ज्योतिरादित्यलक्षणम्। आत्मत्वेन करिष्यतः संस्कुर्वतः। सविता प्रसुवाति प्रसौति अभ्यनुजानाति। तानेव देवान् ॥ ३ ॥

म० अनुष्टुप् द्वितीयः सप्तार्णस्तेनैकोना। सविता तान् प्रसिद्धान् देवान् प्रसुवाति। 'षू प्रेरणे' तुदादिः 'लेटोऽडाटौ' इत्यडागमः। प्रसौति अभ्यनुजानाति प्रेरयतीत्यर्थः। किं कृत्वा। युक्त्वाय युक्त्वा क्त्वो यक् अग्निकर्मणि संयोज्य। किंभूतान्देवान् धिया बुद्ध्या कर्मणा वा अन्येन दिवं दीव्यति प्रकाशत इति दिवम् 'इगुपध–' (पा० ३।१।१३५) इति कप्रत्ययः। द्योतनं स्वः स्वर्गं यतो गच्छतः। इणः शत्रन्तस्य यत इति रूपम्। पुनः कीदृशान्। बृहत् महत् ज्योतिः आदित्यलक्षणमात्मत्वेन करिष्यतः संस्कुर्वतः। कीदृशः सविता। सविता प्रेरयिता अन्येन कर्मणा स्वर्गं गच्छतो देवानग्निकर्मणि सविता प्रेरयिता सविता प्रजापतिः तान्देवानिन्द्रियविशेषान्युक्त्वा विषयेभ्यो नियम्य प्रसुवाति प्रकर्षेणाग्निकर्मणि प्रेरयति। कीदृशान्। स्वर्यतः स्वर्गप्राप्त्यै उद्यतान्। तथा बृहत् प्रौढं ज्योतिः चीयमानस्याग्नेस्तेजः धिया दिवं करिष्यतः तत्तदिष्टकादिविषयया प्रज्ञया द्योतमानं कर्तुमुद्यतान् ॥ ३ ॥

युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः। वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥ ४ ॥

महान् और विद्वान् यजमान के मेधावी वेदिचयन कर्ता ऋत्विज अपने मन को अन्य विषयों से हटाकर वेदिचयन के कर्म में लगाते हैं और वे अपनी बुद्धि को वेदि के परिमाण व ईंटों आदि की लम्बाई-चौड़ाई-मोटाई आदि के विषय वाली बनाते हैं। यज्ञ कर्म के सभी विधानों को जानने वाला वह सविता देव ही इन यजमान

और होमकर्ता ऋत्विजों को धारण करता है। वह एकाकी ही इन यजमान ऋत्विजों को स्वामी-सेवक रूपों में नियमित करता है। उस सविता देव की यही तो एक परम स्तुति है ॥ ४ ॥

उ० युञ्जते मन इत्यादि व्याख्यातम्। इयांस्तु विशेषः। प्रजापतिर्विप्रः बृहद्विपश्चिदित्युच्यते। देवा विप्राः ॥ ४ ॥

म० जगती व्याख्यातापि (पूर्व अ० ५ क० ४) विशेषतो व्याख्यायते। विप्रस्य ब्राह्मणस्य यजमानस्य विशेषेण प्राति पूरयति दक्षिणान्नदानादिनेति विप्रस्तस्य संबन्धिनो विप्रा ऋत्विजो मनो युञ्जते प्रथमं स्वकीयं मनो विषयेभ्यो निवर्त्य समाहितं कुर्वते। उत अपिच। धिय इष्टकादिविषयाणि ज्ञानानि युञ्जते संपादयन्ति। कीदृशस्य विप्रस्य। बृहतः प्रभोः अग्निचयनोद्योगेनाभिवृद्धस्य। तथा विपश्चितः विदुषः प्रयोगाभिज्ञस्य। विप्राः कीदृशाः। होत्राः होमशीलाः जुह्वतीति होत्राः त्रप्रत्ययः कर्मण्यालस्यरहिता इत्यर्थः। ननिवदमृत्विग्यजमानादिकं कुतो जातं तत्राह। एक एव सविता विदधे सर्वमिदं निर्मितवान्। कीदृशः वयुनावित् वयुनानि प्रज्ञानानि वेत्तीति वयुनावित् 'अन्येषामपि दृश्यते' (पा० ६।३।१३७) इति दीर्घः विपश्चित् ऋत्विग्यजमानाभिप्रायज्ञः। कथमेक एव सर्वमिदं कृतवानित्यत आह। यतः सवितुर्देवस्य परिष्टुतिर्मही परितः सर्ववेदेषु श्रूयमाणा स्तुतिर्महती। अचिन्त्यः सवितुर्महिमेत्यर्थः ॥ ४ ॥

युजे वां ब्रह्म पूर्व्यं नमोभिर्विश्लोकऽएतु पथ्येव सूरेः। शृण्वन्तु विश्वेऽअमृतस्य पुत्राऽआ ये धामानि दिव्यानि तस्थुः ॥ ५ ॥

[युजे। वाम्। ब्रह्म। पूर्व्यम्। नमोभिरितिनमः भिः। वि। श्लोकः। एतु। पथ्येवेतिपथ्याऽइव। सूरेः। शृण्वन्तु। विश्वे। अमृतस्य। पुत्राः। आ। ये। धामानि। दिव्यानि। तस्थुः ॥ ५ ॥]

हे पत्नी-यजमान! तुम दोनों के कल्याण के लिए अन्नादि के साथ श्रेष्ठ ब्राह्मण को संयोजित-संतुष्ट करता हूँ। दोनों लोकों को प्राप्त होने वाली इस आहुति के समान ही विद्वान या यज्ञ-कर्म में ऋत्विजों को प्रेरित करने वाले यजमान का यश दोनों लोकों में पहुँचे। उस मरण-रहित प्रजापति के सब देवपुत्र इस यजमान के यश का श्रवण करें कि जिन देवों ने दिव्य स्थानों को अधिष्ठित किया हुआ है ॥ ५ ॥

उ० युजे वाम्। त्रिष्टुप्। दम्पतीयजमानौ वामित्यनेन पदेनोच्येते। युजे युनज्मि। वां युवाभ्यामर्थाय। ब्रह्म पूर्व्यं नमोभिः। प्राणाः सप्त ऋषयो ब्रह्मणा ब्रह्मशब्देनोच्यन्ते। पूर्व्यशब्देन च। नमोभिरन्नैः सहितम्। इयमेवाहुतिरन्नशब्देनोच्यते। किं प्रयोजनमिति चेत्। विश्लोक एतु पथ्येव सूरेः विविधमेतु आगच्छतु श्लोकः कीर्तिः सूरेः पण्डितस्य यजमानस्य। कथमिव। पथ्येव पथः अनपेता पथ्या। यज्ञमार्गप्रवृत्ताहुतिरुभयलोकसंचारिणी भवति एवं यजमानस्योभयलोकसंचारी श्लोको भवत्वित्यभिप्रायः। शृण्वन्तु च विश्वे सर्वे। अमृतस्य अमरणधर्मिणः प्रजापतेः पुत्रा देवाः कीर्तिम्। आ ये धामानि दिव्यानि तस्थुः। आतस्थुः आस्थिताः ये देवाः धामानि स्थानानि दिव्यानि ॥ ५ ॥

म० त्रिष्टुप् आद्यद्वितीयतुर्याणां व्यूहेन पूरणम्। पत्नीयजमानौ वामिति पदेनोच्येते। हे पत्नीयजमानौ, वां युवयोरर्थे नमोभिरन्नैः इदानीं हुतैर्घृतैः सहितं पूर्व्यं पुरातनैर्महर्षिभिरनुष्ठितं ब्रह्म परिवृढमग्निचयनाख्यं कर्माहं युजे युनज्मि संपादयामि। व्यत्ययेन तुदादित्वाच्छः। यद्वा ब्रह्मशब्देन प्राणाः सप्त ऋषयो ब्राह्मणाश्चोच्यन्ते। वामर्थे पूर्व्यं पुरातनं ब्रह्म ब्राह्मणजातिं नमोभिरन्नैर्युजे योजयामि। अन्नैर्विप्रांस्तर्पयामीत्यर्थः। किमर्थमिति चेत् सूरेः पण्डितस्य यजमानस्य श्लोकः कीर्तिर्व्येतु विविधं गच्छतु लोकद्वयं व्याप्नोतु। 'व्यवहिताश्च' (पा० १।४।८२) इति वि एतु अनयोर्व्यवधानम्। तत्र दृष्टान्तः। पथ्या इव पथोऽनपेता पथ्या यज्ञभागप्रवृत्ता आहुतिर्यथा लोकद्वयं व्याप्नोति एवं यजमानस्य श्लोक उभयलोकसंचारी भवत्विति भावः। किंच अमृतस्य मरणधर्मरहितस्य प्रजापतेः पुत्रा विश्वे सर्वे देवा यजमानस्य श्लोकं शृण्वन्तु। के। ये दिव्यानि दिवि भवानि स्थानानि आतस्थुः अधिष्ठितवन्तः ते सर्वेऽस्य कीर्तिं शृण्वन्त्वित्यर्थः ॥ ५ ॥

यस्य प्रयाणमन्वन्य इद्ययुर्देवा देवस्य महिमानमोजसा। यः पार्थिवानि विममे स एतशो रजाᳬंसि देवः सविता महित्वना ॥ ६ ॥

यस्य। प्रयाणम्। प्रयानमितिप्र यानम्। अनु। अन्ये। इत्। ययुः। देवाः। देवस्य। महिमानम्। ओजसा। यः। पार्थिवानि। विममऽइतिवि ममे। सः। एतशः। रजाᳬंसि। देवः। सविता। महित्वनेतिमहि त्वना। वाचः। पतिः। वाचम्। नः। स्वदतु ॥ ६ ॥]

जिस सवितादेव के गमन को अन्य सब देवता अनुसृत करते हैं और जिस देव की महती महिमा को अपने ओज-तेज से सब देव अनुगमित करते हैं (=उसकी महिमा से ही देवों का ओज-तेज है या सब देव उसके अनुशासन को स्वीकार करते हैं)। जिसने इन सभी पार्थिव पदार्थों को बनाया है—वही सर्वप्रेरक परमात्मा स्वमहिमा से सर्वत्र व्याप्त हो रहा है ॥ ६ ॥

उ० यस्य प्रयाणम्। जगती सवितैव प्रजापतिरत्राभिप्रेयते। व्यवहितपदप्रायमिदं मन्त्रवाक्यम्। यस्य देवस्य प्रमाणं अनु प्रगमनमनु अन्ये देवा ययुः जग्मुः। इच्छब्दोऽनर्थकः। महिमानमोजसा। महिमानं महाभाग्यं विभूतिम्। ओजसा बलेन ययुर्देवाः। यश्च सविता देवा पार्थिवानि रजांसि विममे। 'लोका रजांस्युच्यन्ते'। पृथिवीप्रभृतीन् लोकान्निममीते महित्वना स्वकीयेन महाभाग्येन। स एतशः एतज्जगत्स्थावरजङ्गमं प्राणभावेन शेत इति सविता एतश इत्युच्यते। यद्वा एतश इत्यश्वनामसु पठितम्। सोऽश्वरूपेण समस्तमेतज्जगदवष्टभ्य स्थितः। तदुक्तम् 'उषा वा अश्वस्य

मेध्यस्य शिरः' इत्यादिना 'सूरादश्वं वसवो निरतष्ट' इति च ॥ ६ ॥

म० सावित्री जगती प्रथमस्य व्यूहेन पूरणम् । अन्ये देवा यस्य सवितुः प्रयाणं प्रवृत्तिमनुययुरित् अवश्यमनुगच्छन्त्येव । यत्प्रवृत्तिमनुवर्तन्त इत्यर्थः । अन्ये देवा यस्य देवस्य महिमानं महत्त्वं च ओजसा बलेनानुययुः । यश्च सविता पार्थिवानि रजांसि विममे पृथिवीप्रभृतींश्त्रींल्लोकान्मिमीते । 'लोका रजांस्युच्यन्ते' (निरु० ४ । १९) इति यास्कः । स देवः महित्वना स्वकीयेन महाभाग्येन एतशः एतज्जगत्त्रयं स्थावरजङ्गमं प्राणभावेन शेते व्याप्नोतीत्येतशः महेर्महतो भावो महित्वं तेन । भावे छान्दसस्त्वन्प्रत्ययः । यद्वा एतश इत्यश्वनामसु पठितम् । स देव एतशः अश्वरूपेण सर्वं जगदवष्टभ्य स्थितः । 'उषा वा अश्वस्य मेध्यस्य शिरः' (१० । ६ । ४ । १) इति श्रुतेः 'सूरादश्वं वसवो निरतष्टे' ति वक्ष्यमाणत्वाच्च (अ० २९ का० १३ ॥ ६ ॥

देवं सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय । दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु ॥ ७ ॥

हे सवितादेव ! तुम यज्ञ को प्रेरित करो और यज्ञकर्त्ता यजमान के भी परम सौभाग्य (स्वर्गादि फल) के लिए प्रेरित करो । स्वर्गस्थ ज्ञान को पवित्र करने वाला और वेदवाणी को धारण करने वाला यह सवितादेव हमारे ज्ञान को पवित्र करे । वाणी का स्वामी वह प्रजापति हमारी इस स्तुतिवाणी को ग्रहण करे ॥ ७ ॥

उ० देवसवितरिति व्याख्यातम् । इयांस्तु विशेषः । वाचस्पतिर्वाचं नः स्वदतु इति । 'वाचा वा इदं कर्म प्राणो वाचस्पतिः' इति ॥ ७ ॥

म० त्रिष्टुप् । व्याख्यातापि (अ० ९ का० १) कथ्यते । हे देव सवितः, यज्ञं प्रसुव प्रकर्षेण प्रेरय यज्ञपतिं यजमानं च भगाय सौभाग्याय प्रसुव । किंच दिव्यो दिवि भवः स्वर्गस्थः केतपूः केतं परचित्ते वर्तमानं ज्ञानं पुनाति शोधयतीति केतपूः ईदृशो गन्धर्वः गां वाचं धारयतीति गन्धर्वः सविता नोऽस्माकं केतं चित्तवर्ति ज्ञानं पुनातु ब्रह्मविवर्तनेन शोधयतु । वाचः वाण्याः पतिः सविता नोऽस्मदीयां वाचं स्वदतु स्वादयतु । अस्मदुक्ता वाक्तस्मै रोचतामित्यर्थः ॥ ७ ॥

इमं नो देव सवितर्यज्ञं प्रणय देवाव्यꣳ सखिविदꣳ सत्राजितं धनजितꣳ स्वर्जितम् । ऋचा स्तोमꣳ समर्धय गायत्रेण रथन्तरं बृहद्गायत्रवर्तनि स्वाहा ॥ ८ ॥

[इमम् । नः । देव । सवितः । यज्ञम् । प्र । नय । देवाव्यमिति देव अव्यम् । सखिविदमिति सखि विदम् । सत्राजितमिति सत्रा जितम् । धनजितमिति धन जितम् । स्वर्जितमिति स्वः जितम् ॥ ऋचा । स्तोमम् । सम् । अर्द्धय । गायत्रेण । रथन्तरमिति रथम् तरम् । बृहत् । गायत्रवर्त्तनीति गायत्र वर्त्तनि । स्वाहा ॥८॥

हे सवितादेव ! देवों को प्रीणित करने वाले, स्वनिष्पादक यजमानमित्र को जानने वाले, सत्यब्रह्म को जीतने वाले, धन को जीतने वाले और स्वर्ग को विजित करने वाले हमारे इस प्रवर्त्यमान यज्ञ को तुम निर्विघ्नता से पार ले चलो । हे सवितादेव ! ऋचा के द्वारा हमारे त्रिवृदादि स्तोत्र को पूर्णतया पल्लवित करो । गायत्रसाम के द्वारा रथन्तर और बृहत्साम को बढ़ाओ कि जिस बृहत्साम का गायत्रसाम ही मार्गभूत है ॥ ८ ॥

उ० इमं नो देव । आ अवसानाद्यजुः । इमं यज्ञं नोऽस्माकं हे देव सवितः, प्रणय प्रापय । कथंभूतं यज्ञम् । देवाव्यम् देवा यस्मिन्नव्यन्ते तर्प्यन्ते स देवाव्यः । सखिविदम् सखायो यस्य विद्यन्ते स सखिवित्, सखीन्वा यो विन्दते स सखिवित् तं सखिविदम् । सत्राजितम् । सत्राशब्दः सत्यवचनः । सत्यं ब्रह्म यो जयति स सत्राजित् तं सत्राजितम् । धनं यो गवादि जयतीति धनजित् तं धनजितम् । स्वर्गलोकं यो जयति स स्वर्जित् तं स्वर्जितं । ऋचा स्तोमम् गायत्र्यनवसानया ऋचा ऋग्वेदेन सह स्तोमं त्रिवृदादि समर्धय । गायत्रेण साम्ना सह रथन्तरं समर्धय । बृहत् महत् । कथंभूतं महत् । गायत्रवर्तनि गायत्रं यस्य बृहतो वर्तनि वर्त्मभूतम् ॥ ८ ॥

म० अवसानपर्यन्तं यजुः तस्य प्राजापत्या जगती छन्दः । हे सवितर्देव, नोऽस्माकमिमं यज्ञं प्रणय प्रापय । कीदृशं यज्ञम् । देवाव्यं देवा अव्यन्ते तर्प्यन्ते यस्मिन्नसौ देवावीः तम् । 'अव प्रीणनादौ' अस्मादौणादिक ईप्रत्ययः । तथा सखिविदं सखायं स्वनिष्पादकं यजमानं वेत्तीति तम् । 'विद ज्ञाने' सखीनृत्विजो विन्दते प्राप्नोतीति वा सखिवित्तम् 'विद्लृ लाभे' सखायो विद्यन्ते यस्मिन्निति वा 'विद सत्तायाम्' । सत्राजितं सत्राणि द्वादशाहादीनि जयति वशीकरोतीति सत्रजित्तम् तानि हि चीयमानमग्निमपेक्षन्ते । यद्वा सत्राशब्दः सत्यवाची । सत्रा सत्यं ब्रह्म जयतीति । धनजितं धनं गवादि फलरूपेण यो जयति संपादयतीति धनजित् । स्वर्जितं स्वः स्वर्गं जयति फलत्वेन संपादयतीति स स्वर्जित्तम् । किंच ऋचा स्तोमम् गायत्री अवसानरहिता यजुरन्ता स्वाहेति यजुः । हे सवितः, ऋचा स्तोत्रहेतुसामाधारभूतया ऋचा सह स्तोमं त्रिवृदादिकं समर्धय समृद्धं कुरु । गायत्रेण साम्ना सह रथन्तरं साम समर्धय बृहत् साम च समर्धय । कीदृशं बृहत् । गायत्रवर्तनि गायत्रं सामैव वर्तनिर्मार्गो यस्य तत् । बृहत्साम्नो गायत्रं साम वर्त्मभूतमित्यर्थः ॥ ८ ॥

देवस्य॑ त्वा सवि॒तुः प्र॑स॒वे॒ऽश्विनो॑र्बा॒हुभ्या॑म् पू॒ष्णो हस्ता॑भ्याम् । आद॑दे गाय॒त्रेण॒ छन्द॑साङ्गिर॒स्वत्पृ॑थि॒व्याः स॒धस्था॑द॒ग्निं पु॑री॒ष्य॒मङ्गिर॒स्वदाभ॑र॒ त्रैष्टु॑भेन॒ छन्द॑साङ्गिर॒स्वत् ॥ ९ ॥

आ । द॒दे॒ । गा॒य॒त्रेण॑ । छन्द॑सा । अ॒ङ्गि॒र॒स्वत् । पृ॒थि॒व्याः । स॒धस्था॒दिति॑ स॒ध स्था॑त् । अ॒ग्निम् । पु॒री॒ष्य॒म् । अ॒ङ्गि॒र॒स्वत् । आ । भ॒र । त्रैष्टु॑भेन । त्रैस्तु॑भेनेति॒ त्रैस्तु॑भेन ॥९॥

हे अग्ने ! सवितादेव की अनुज्ञा में वर्तमान मैं तुम्हें अश्विनौ की बाहुओं और पूषादेव के हाथों के द्वारा, पूर्वज अङ्गिरा के समान, गायत्रीछन्द, बोल कर ग्रहण करता हूँ। हे अग्ने ! अब तुम अंगिरा के समान ही मेरे निमित्त भी पृथ्वी के नीचे से जलीय या पशुहितकारी अग्नि को आहृत करो—अंगिरा के समान त्रिष्टुभ् छन्द के द्वारा ॥ ९ ॥

उ० अग्निमादत्ते देवस्य त्वा । व्याख्यातम् । आददे गृह्णामि अहं गायत्रेण छन्दसा । अङ्गिरस्वत् अङ्गिरसा तुल्यमङ्गिरोवदिति प्राप्ते 'अयस्मयादीनि छन्दसि' इति भसंज्ञा । श्रुतौ तु अग्निवदिति व्याख्यातम् । अग्निरुच्यते । त्वं च गृहीता सती पृथिव्याः सधस्थात्समानस्थानात् । अग्निं पुरीष्यं पशव्यम् । अङ्गिरस्वदाभर अङ्गिरसा तुल्यम् अग्निवद्वा आभर । 'हृग्रहोर्भश्छन्दसि' इति हकारस्य भकारः । आहर त्रैष्टुभेन छन्दसा अङ्गिरस्वत् ॥ ९ ॥

म० 'देवस्य त्वेत्यभ्रिमादाय हस्त अधायेत्येनामभिमन्त्रयते' (का० १६ । २ । ८) । अस्यार्थः । देवस्य त्वेति कण्डिकाद्वयात्मकमन्त्रेण वैणवीमभ्रिमादाय हस्त आधायेति ऋचा (क० ११) एनामभ्रिमभिमन्त्रयते । देवस्य त्वा प्रजापतिः साध्या वा ऋषयः सावित्रं यजुः । व्याख्यातम् । आददे अभ्रिर्देवता अतिधृतिश्छन्दः । हे अभ्रे, सवितुर्देवस्य प्रसवे प्रेरणे सति अश्विनोः संबन्धिभ्यां मणिबन्धपर्यन्ताभ्यां बाहुभ्यां पूष्णः संबन्धिभ्यां साङ्गुलिभ्यां हस्ताभ्यां साधनभूताभ्यां गायत्रेण छन्दसा सहायभूतेन युक्तः सन् त्वा त्वामाददे गृह्णामि । तत्र दृष्टान्तः । अङ्गिरस्वत् अङ्गिरोभिस्तुल्यमङ्गिरोवदिति प्राप्ते 'अयस्मयादीनि छन्दसि' (पा० १ । ४ । २०) इति भसंज्ञायामङ्गिरस्वदिति रुत्वाभावः । आङ्गिरस ऋषयः पूर्वं यथा त्वामगृह्णन् तद्वत् । हे अभ्रे, त्वं गृहीता सती पृथिव्याः सधस्थात् सहस्थानादुत्सङ्गात् अग्निमाभर आहर 'हृग्रहोर्भश्छन्दसि' (पा० ८ । २ । ३२ वा० १) इति हस्य भः । त्रैष्टुभेन छन्दसा कृत्वा अङ्गिरस्वत् अङ्गिरसो यथाग्निमाजहुः पुनरङ्गिरस्वदिति दृष्टान्तार्थातिशयार्थः 'अभ्यासे भूयांसमर्थं मन्यन्ते' (निरु० १० । ४२) इति यास्कोक्तेः । किंभूतमग्निम् । पुरीष्यं 'पशवो वै पुरीषम्' (६ । ३ । १ । ३८) इति श्रुतेः पुरीषेभ्यः पशुभ्यो हितः पुरीष्यस्तं पशव्यम् । यद्वा पुरीषशब्देन पांशुरूपा शुष्का मृदुच्यते तदर्हतीति पुरीष्योऽग्निः मृदमादायोखां कृत्वा तस्यामग्निः स्थाप्यते यतोऽतो मृदग्न्योरभेदोपचारेण मृदाहरणमेवाग्न्याहरणमित्यभिप्रायेण पुरीष्यमग्निमाहरेत्युच्यते । अयं चोपचारोऽग्निचयनप्रकरणे सर्वत्रानुवर्तिष्यते ॥ ९ ॥

अभ्रि॑रसि॒ नार्य॑सि॒ त्वया॑ व॒यम॒ग्निꣳ श॑केम॒ खनि॑तुꣳ स॒धस्थ॒ आ जाग॑तेन॒ छन्द॑साङ्गिर॒स्वत् ॥ १० ॥

अभ्रिः॑ । अ॒सि॒ । नारी॑ । अ॒सि॒ । त्वया॑ । व॒यम् । अ॒ग्निम् । श॒के॒म॒ । खनि॑तुम् । स॒धस्थ॒ऽइति॑ स॒ध स्थे॑ । आ ॥ जाग॑तेन ॥१०॥

हे अभ्रे ! तुम बाँस की बनी अभ्री हो। तुम स्त्रीलिङ्ग हो। हे अभ्रे ! अंगिरा के समान हम भी तुम्हारे द्वारा जगती छन्द से पृथ्वी के उत्संग में विद्यमान अग्नि को खोद निकालने में समर्थ होवें ॥ १० ॥

उ० अभ्रिरसि । नारी स्त्री त्वमसि । किंच त्वया वयम् अग्निं शकेम । खनितुं सधस्थे आ । समानस्थानेषु वर्तमानं पृथिव्याः । आकारोऽनर्थकः । जागतेन छन्दसा अङ्गिरस्वत् ॥ १० ॥

म० त्वमभ्रिरसि उखां निर्मातुं मृत्खननहेतुभूतकाष्ठविशेषोऽसि । नारी असि स्त्रीरूपा चासि । यद्वा न विद्यते अरिः शत्रुर्यस्याः सा नारी । ईप् छान्दसः । खननकाले अश्मादिना तव कुण्ठीभावो नास्तीत्यर्थः । किंच त्वया युक्ता वयं सधस्थे पृथिव्या उत्सङ्गे वर्तमानमग्निं जागतेन छन्दसा खनितुं शकेम शक्ता भवेम । शक्नोतेर्व्यत्ययेन शप् । अङ्गिरस्वदिति दृष्टान्तः पूर्ववत् ॥ १० ॥

हस्त॑ आ॒धाय॑ सवि॒ता बिभ्र॑द॒भ्रिꣳ हि॑र॒ण्ययी॑म् । अ॒ग्नेर्ज्योति॑र्नि॒चाय्य॑ पृथि॒व्या अध्याभ॑र॒दानु॑ष्टुभेन॒ छन्द॑साङ्गिर॒स्वत् ॥ ११ ॥

हस्ते॑ । आ॒धाये॒त्या धाय॑ । स॒वि॒ता । बिभ्र॑त् । अभ्रि॑म् । हि॒र॒ण्ययी॑म् । आनु॑ष्टुभेन । आनु॑स्तुभे॒नेत्यानु॑स्तुभेन ॥११॥

प्रजापति ने सुनहली अभ्री को हाथ में लेकर धारण किया। उसने अंगिरा के समान अनुष्टुभ् छन्द से पृथ्वी के नीचे अग्नि की ज्योति की विद्यमानता का निश्चय करके उसे वहाँ से आहृत किया ॥ ११ ॥

उ० अग्निमभिमन्त्रयते । हस्त आधाय । अनुष्टुप् यजुरन्ता । आनुष्टुभेनेत्यादि यजुः । हस्ते अग्निमाधाय सविता ततस्तामेवाभ्रिं बिभ्रत् धारयन् । हिरण्ययीममृतमयीं छन्दोमयीं वा । अग्नेर्ज्योतिर्निचाय्य निभाल्य दृष्ट्वा । ततः पृथिव्या